M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref. / Ser. 1542

Title : Uttara Lalita Puja

1542

Incomplete

Upāṅga

Uttara-Lalitā Pūjā : Title

: Author

: Editor

: Year, Vols.

: Publisher

1542. : Remarks

अथदूर्वांकुरांत्साग्रा चत्वारिंशत्तथाष्टभिः॥अधिका
न्हेत्तमादा यमंत्रमेवमुदीरयेत॥अथदूर्वामंत्रः॥ॐ व
कुम्रेरोहासततममृताहरिताललता॥यथेयंललितेमा
तेतथामेस्युर्मनोरथाः॥दूर्वांकुराणिसम०॥ॐ यत्पुष्प्य
०ॐ नमः काम० देवद्रुमरसोद्भूतंकालागरुसमन्वितं॥
आघ्रेयतामयंधूपोभवानीघ्राणदर्पणं॥धूपंस०ॐ श्रा
ह्मणो०कर्दमेन०चक्षुर्दंसर्वलोकानांतिमिरस्यनिवार
णं॥आर्तिक्यंकल्पितंभक्त्यागृहाणपरमेश्वरी॥दीपंस०
ॐ चंद्रमामनसो०ॐ आर्द्रांजंतु० मोदकाम्रपल्लव्रकान्व

ट कोदुंबरादिभिः॥ सघृतं पायसं नानानैवेद्यं प्रतिगृह्यतां॥
नैवेद्यं॥ स्वादुःपवस्व० एलोशीरलवंगादि कर्पूरपरिवासि
तं॥ प्राशनार्थं कृतं तोयं गृहाण परमेश्वरी॥ प्राशनार्थे पानी
यं०॥ उत्तरापोशनं कौसुं तोयमुघतमुज्वलं॥ मयानिवेदि
तं भक्त्या गृहाण परमेश्वरी॥ उत्तरापोशनं॥ शक्त्या उछिष्टचां
डालि सोमसूर्यहुताशनः॥ श्रीललिता प्रसादोयं सर्वे
गृह्णंतु शक्तिकाः॥ नैवेद्यमध्ये उछिष्टभागं॥ मृगनाभि
समायुक्तं कदलीसंवान्वितं॥ करोद्वर्तनकं देवी प्रीत्यर्थं १३
प्रतिगृह्यतां॥ करोद्वर्तनार्थे चंदनं॥ पूगीफलं महद्दिव्यं

नागवल्लीदलैर्युतं॥ कर्पूरेलासमायुक्तं तांबूलं प्रतिगृ
ह्यतां॥ तांबूलं॥ बीजापुराम्रपनससंखर्जुरी कदलीयुतं॥
नारीकेलं महादिव्यं ललिते प्रतिगृह्यतां॥ नारीकेलफलं॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः॥ अनंतपुण्य
फलदमतः शांतिं प्रयच्छ मे॥ दक्षिणा॥ सवितुस्किरण
स्फुर्द्धिः स्फुरत्किरणमंडले॥ दर्पणं मणिभिः क्लृप्तं गृहाण प
रमेश्वरि। दर्पणं॥ हरिन्मणिगणाढ्यं दंडं शशिकरप्रभं॥
सुवर्णकलशाछत्रं गृहाण परमेश्वरि॥ छत्रं॥ निर्यन्नदीप्रभा
हाभे चामरे विशिरप्रभे॥ स्वर्णदंडोपशोभाढ्ये गृहाण परमे

उ.ल.पू. श्वरी ॥ चामरं ॥ प्रवालनालसत्त्रंमुक्तामंडितमुत्तमं ॥ पद्
१८ सूत्रयुतंमेचंगृहाणपरमेश्वरी ॥ मंचकं ॥ उशीरनिर्मितं
दिव्यंहेमदंडपरिष्कृतं ॥ व्यजनंकल्पितंभक्त्यागृहाणपर
मेश्वरि ॥ व्यजनं ॥ उपांगललितेदेवी विश्वात्मंदत्तमायया
॥ अश्मोशिबिकयादेवी गृहाणपरमेश्वरि ॥ शिबिकां ॥ चं
द्रादित्यौचधरणीविद्युदग्निस्तथैवच ॥ त्वमेवसर्वज्यो
तींषि आर्तिक्यंप्रतिगृह्यतां ॥ ॐ श्रियेनमः नीराजदीपं १८
॥ ॐ नाभ्या आसी० आर्द्रांयः क० अंजलिंगृहतांदेवी
भक्तिमेलैंचकौ कुरु ॥ उपांगललितेमातेपाहिमांभवसा